# Ruchikritam Pitri Stotram

# રુચિકૃતં પિતૃસ્તોત્રમ્

## Document Information

Text title : Ruchikritam Pitri Stotram

File name : ruchikRRitaMpitRRistotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 157/44-89||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# રુચિકૃતં પિતૃસ્તોત્રમ્

બ્રહ્મા તિરોઽભવત્તત્ર નદીતીરે રુચિસ્તતઃ ।
પિતૄન્ સન્તર્પ્ય તુષ્ટાવ પ્રણતો ભક્તિગૌરવઃ ॥ ૪૪॥

નમસ્યે શ્રીહરિકૃષ્ણં શાશ્વતં વૈ પિતામહમ્ ।
અનાદિશ્રીકૃષ્ણનારાયણં શ્રીપુરુષોત્તમમ્ ॥ ૪૫॥

નમસ્યે શ્રીબ્રહ્મધામાઽક્ષરં મુક્તાન્ મહેશ્વરાન્ ।
નમસ્યે સર્વશક્ત્યૈશ્વર્યાણિ ગુણાન્ પિતામહાન્ ॥ ૪૬॥

હેતીન્ સમસ્તભૂતીશ્ચ વિભૂતીરીશ્વરીંસ્તથા ।
મુક્તાનિકા અવતારાન્ માતૄઁશ્ચ શ્રીરમાદિકાઃ ॥ ૪૭॥

નમસ્યે વ્યૂહસંજ્ઞાઁશ્ચ નમસ્યે ચ વિરાજકાન્ ।
નમસ્યે સત્યલોકસ્થાન્ સાધૂન્ બ્રહ્મવિદઃ સતઃ ॥ ૪૮॥

નમસ્યે તાન્ શ્રાદ્ધપિતૄન્ શ્રાદ્ધે યે ચાધિદેવતાઃ ।
દેવૈરપિ ચ તર્પ્યન્તે યે શ્રાદ્ધે તાન્નમામ્યહમ્ ॥ ૪૯॥

નમસ્યેઽહં ચ તાન્ સ્વર્ગે તર્પ્યન્તે યે મહર્ષિભિઃ ।
તથા સિદ્ધજનૈશ્ચાપિ તર્પ્યન્તે તાન્નમામ્યહમ્ ॥ ૫૦॥

ગુહ્યકૈરપિ યેઽઽર્ચ્યન્તે ઋદ્ધ્યર્થં તાન્નમામ્યહમ્ ।
નમસ્યેઽહં ચ તાન્ પિતૄન્ યેઽર્ચ્યન્તે માનવૈર્ભુવિ ॥ ૫૧॥

નમસ્યેઽહં ચ તાન્ પિતૄન્ સ્વેષ્ટલોકપ્રદાયિનઃ ।
યેઽર્ચ્યન્તે શ્રદ્ધયા વિપ્રૈઃ શ્રાદ્ધકર્મસુ તર્પિતાઃ ॥ ૫૨॥

પ્રાજાપત્યપદદાતૄન્ નમસ્યે વનિતર્પિતાઃ ।
તાન્નમસ્યે નૈષ્ઠિકાનાં ફલદાતૄન્ પ્રપૂજિતાન્ ॥ ૫૩॥

રાજન્યતર્પિતાન્ પિતૄન્નમસ્યે મખપૂજિતાન્ ।
વૈશ્યપ્રપૂજિતાન્ પિતૄન્ નમસ્યે કવ્યભોજનાન્ ॥ ૫૪॥

શૂદ્રાઽર્ચિતાન્નમસ્યે તાન્ સુકાલિનોઽન્નપૂજિતાન્ ।
આસુરાઽર્ચિતપિતૄંશ્ચ સ્વધાહારાન્નમામિ ચ ॥ ૫૫॥

પાતાલવાસિનો યાન્ યે તર્પ્યન્તે શ્રાદ્ધકર્મસુ ।
સ્વધાહારાન્ નમસ્યેઽહં રસાતલૈઃ પ્રપૂજિતાન્ ॥ ૫૬॥

ભોગૈરશેષૈર્નાગાદ્યૈઃ સર્વૈશ્ચાપિ પ્રપૂજિતાન્ ।
પિતૄન્નમસ્યે દ્યુસ્થાઁશ્ચાઽન્તરિક્ષાસ્થાન્ મહીસ્થિતાન્ ॥ ૫૭॥

વિમાનસ્થાન્ મૂર્તરૂપાન્ પિતૄન્નમામિ સર્વદા ।
યોગિજનૈઃ પૂજિતાઁસ્તાન્ ક્લેશમુક્તિપ્રદાન્ શુભાન્ ॥ ૫૮॥

પિતૄંસ્તાઁશ્ચ નમસ્યેઽહં મૂર્તાન્ સ્વધાભુજઃ સદા ।
કામ્યફલપ્રદાન્ સર્વાન્ સ્વર્ગસ્થાન્ મોક્ષદાનપિ ॥ ૫૯॥

તૃપ્યન્ત્વિચ્છાવતાં કામપ્રદાઃ સુરત્વપુત્રદાઃ ।
ઐન્દ્રસૌરપદદાશ્ચ પશુસ્વગૃહશક્તિદાઃ ॥ ૬૦॥

ચન્દ્રે સૂર્યે રશ્મિવાસા વિમાનસ્થા જલાન્નકૈઃ ।
ગન્ધરસાદિભિઃ સર્વે તૃપ્યન્તાં ચામૃતપ્રદાઃ ॥ ૬૧॥

અગ્નૌ હુતાન્નભોક્તારો હવિર્ભુજોઽપિ યેઽપરે ।
વિપ્રદેહનિવાસાશ્ચ સાધુદેહનિવાસિનઃ ॥ ૬૨॥

પિણ્ડાદાસ્તૃપ્તિમાયાન્તુ મયાઽર્પિતાઽઽફલાદિભિઃ ।
કૃષ્ણતિલૈઃ શાકપત્રૈઃ પ્રીણિતા યન્તુ તે મુદમ્ ॥ ૬૩॥

ક્રવ્યાદાશ્ચામરપૂજ્યાઃ પુષ્પગન્ધાન્નભોજનૈઃ ।
તૃપ્તિમાયાન્તુ તે સર્વે પિતરઃ સ્વર્ગદાયિનઃ ॥ ૬૪॥

પ્રત્યહં પૂજિતા માસપૂજિતા યેઽષ્ટકાસુ ચ ।
સમાન્તેઽભ્યુદયે પૂજ્યાસ્તૃપ્યન્તુ પિતરોઽપિ મે ॥ ૬૫॥

શ્વેતા વિપ્રાર્ચિતાસ્વાર્કવર્ણાઃ ક્ષત્રિયપૂજિતાઃ ।
સ્વર્ણવર્ણા વૈશ્યપૂજ્યા નીલાઃ શૂદ્રપ્રપૂજિતાઃ ॥ ૬૬॥

પુષ્પગન્ધરસૈર્ધૂપૈસ્તોયાન્નફલપત્રકૈઃ ।
અગ્નિહુતેન ચાજ્યેન તૃપ્તિં યાન્તુ નતોઽસ્મિ તાન્ ॥ ૬૭॥

દેવપૂર્વાઃ કવ્યભુજો ભૂતિસ્રજો ભવન્તિ યે ।
ભૂતપ્રેતાઽસુરરક્ષઉગ્રપિતૄન્ નમામ્યપિ ॥ ૬૮॥

અગ્નિષ્વાત્તા બર્હિષદ આજ્યપાઃ સોમપાસ્તથા ।
તેઽપિ તૃપ્તિં પ્રપદ્યન્તાં તર્પિતાઃ શ્રદ્ધયા મયા ॥ ૬૯॥

પ્રાચીં રક્ષન્ત્વગ્નિષ્વાત્તા યામ્યાં બર્હિષદસ્તથા ।
પ્રતીચીમાજ્યપા રક્ષન્ત્વુદીચીં સોમપા મમ ॥ ૭૦॥

રક્ષોભૂતપિશાચેભ્યો દુષ્ટાભિચારમન્ત્રતઃ ।
આસુરપ્રેતદેહિભ્યો યમો રક્ષતુ માં સદા ॥ ૭૧॥

એકત્રિંશત્પિતૃગણાસ્તુષ્ટા યચ્છન્તુ મે હિતમ્ ।
વિશ્વા વિશ્વભુજો ધર્મા ધન્યાઃ શુભાનનાસ્તથા ॥ ૭૨॥

આરાધ્યા ભૂતિદા ભૂતિકૃતશ્ચ ભૂતયો નવ ।
કલ્યાણાઃ કલ્યતાઃ કર્તારશ્ચ કલ્પત્વહેતવઃ ॥ ૭૩॥

કલ્યતરાશ્રયાશ્ચેતિ ષટ્પિતૃગણાસ્તથા ।
વરા વરેણ્યા વરદાઃ પુષ્ટિદાસ્તુષ્ટિદાસ્તથા ॥ ૭૪॥

ધાતારો વિશ્વપાતારઃ સપ્ત પિતૃગણાશ્ચ તે ।
મહાન્તશ્ચ મહાત્માનો મહિતાશ્ચ મહાબલાઃ ॥ ૭૫॥

મહિમાવન્ત ઇત્યેતે પઞ્ચ પિતૃગણાસ્તથા ।
સુખદા ધનદાશ્ચાપિ ધર્મદા ભૂતિદાસ્તથા ॥ ૭૬॥

ગણાશ્ચત્વાર એવાપિ સર્વે તુષ્યન્તુ મેઽર્ચિતાઃ** ।
એવં વૈ સ્તુવતસ્તસ્ય રુચેસ્તુ તેજસાં ચયઃ ॥ ૭૭॥

સમુત્થિતઃ પુરતશ્ચ તં તુષ્ટાવ રુચિસ્તદા ।
અમૂર્તાનર્ચિતાનત્ર તેજોમયાનુપસ્થિતાન્ ॥ ૭૮॥

નમસ્યામિ ધ્યાનગમ્યાન્ પિતૄઁસ્તાન્ દિવ્યવિગ્રહાન્ ।
ઇન્દ્રાદીશાન્ દક્ષમારીચર્ષિનેતૄન્ નમામિ ચ ॥ ૭૯॥

મનુમુનીન્દ્રચન્દ્રાઽર્કેશ્વરાન્ પિતૄન્નમામિ ચ ।
જલેવાસાન્ ગ્રહનક્ષત્રેશાન્ વાય્વગ્નિપૂજિતાન્ ॥ ૮૦॥

નભઃસ્થાન્ ભૂસ્વર્ગવાસાન્ નમસ્યામિ કૃતાઞ્જલિઃ ।
દેવર્ષિજનકાઁશ્ચાપ્યક્ષય્યદાતૄન્ નમામિ ચ ॥ ૮૧॥

પ્રજેશાય કશ્યપાય સોમાય વરુણાય ચ ।

યોગેશ્વરેભ્યઃ સિદ્ધેભ્યઃ સદ્ભ્યો નમામિ સાઞ્જલિઃ ॥ ૮૨॥

સપ્તલોકગણેભ્યશ્ચ સ્વયમ્ભૂપરમેષ્ઠિને ।
સોમપ્રેભ્યશ્ચ નમઃ સોમાય ચ નમો નમઃ ॥ ૮૩॥

અગ્નિરૂપાન્ યોગિનશ્ચ નમસ્યામ્યધ્વરસ્થિતાન્ ।
તેજઃસ્થાન્ સોમસૂર્યાગ્નિમૂર્તીન્નમામિ વૈ પિતૄન્ ॥ ૮૪॥

વ્રહ્મસ્વરૂપિણઃ સિદ્ધાન્ બ્રહ્મચર્યપરાયણાન્ ।
નમામિ સત્યલોકસ્થાનીશ્વરાનાવૃતિસ્થિતાન્ ॥ ૮૫॥

વૈરાજાન્ વૈષ્ણવાન્ ભૌમાન્ શ્રીપુરસ્થાઃ શ્રીયોષિતઃ ।
અવ્યાકૃતાઽમૃતસ્થાઁશ્ચ ગોલોકસ્થાન્ નમાનિ ચ ॥ ૮૬॥

વૈકુણ્ઠસ્થાનક્ષરસ્થાનવતારાન્ નમામિ ચ ।
અવતારિણીશ્ચ સર્વા મુક્તાનિકા નમામિ ચ ॥ ૮૭॥

મુક્તાઁશ્ચ પાર્ષદાન્ સર્વાનૈશ્વર્યાણિ નમામિ ચ ।
અનાદિશ્રીકૃષ્ણનારાયણં શ્રીવલ્લભં પ્રભુમ્ ॥ ૮૮॥

બ્રહ્મપ્રિયાઃ સમસ્તાશ્ચ માતૄર્હરિપ્રિયાસ્તથા ।
હેતીન્ ગુણાન્ વિભૂતીંશ્ચ નમામિ પ્રસીદન્તુ મે ॥ ૮૯॥

ઇતિસ્તુતાસ્તે પિતરસ્તેજસો નિર્યયુઃ શુભાઃ ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૫૭-અધ્યાયાન્તર્ગતં રુચિકૃતં પિતૃસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૫૭/૪૪-૮૯॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 157/44-89..

Proofread by PSA Easwaran

*Ruchikritam Pitri Stotram*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*